अपि च।
"मत्स्यण्डिकाः खण्डसिता गुणश्रेष्ठा यथोत्तरम्
विमलाः शीतलाः स्निग्धा गुर्व्वः स्वादुतराः सराः ॥
तृष्णास्तृक्षतक्षीणरक्तपित्तानिलापहाः।
मत्स्यण्डी ग्राहिणी बल्या कषाया वातजिद्गुरुः ॥
खण्डं गुरु सरं रुच्यं वातघ्नं बलपुष्टिदम्।
सितोपला सरा गुर्वी वातघ्नी न कफप्रदा ॥"
इति पथ्यापथ्यविवेकः ॥*॥

अन्यच्च।
"शर्करा ज्वरपित्तास्रङ्मूर्च्छाछर्दितृषापहा।
तृष्णाघ्नस्तवराजस्तु ज्वरदाहास्रपित्तनुत् ॥
लसिकाफाणितगुड़खण्डमत्स्यण्डिकासिताः।
निर्म्मला लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम्।
यथा यथैषां वैमल्यं भवेच्छैत्यं तथा तथा ॥"
इति राजवल्लभः ॥*॥

किञ्च।
"खण्डन्तु सिकतारूपं सुश्वेतं शर्करा सिता।
सिता सुमधुरा रुच्या वातपित्तास्रदाहजित्।
मूर्च्छाछर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ॥*॥
भवेन्मधुसिता शीता रक्तपित्तहरी लघुः।
सितोपला सरा लघ्वी वातपित्तहरी हिमा ॥*॥
मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः।
छर्द्यतीसारतृड्दाहरक्तक्तुवरा हिमा ॥
यथा यथैषां नैर्म्मल्यं मधुरत्वं तथा तथा।
स्नेहलाघवशैत्यानि रसत्वञ्च तथा तथा ॥"
इति भावप्रकाशः ॥*॥

उपला। कर्परांशः। (यथा, महाभारते। १। ५५। २।
"ततो वायुर्म्महान् शीघ्रो नीचैः शर्करवर्षणः॥")
शर्करान्वितदेशः। रोगभेदः। शकलम्। इति मेदिनी ॥ शर्करारोगस्य निदानचिकित्सादिर्मूत्रकृच्छ्रशब्दे द्रष्टव्यः ॥(कूर्म्मचक्रस्य पुच्छदेशस्थितदेशविशेषः। यथा, मार्कण्डेये। ५८।३५।
"तारक्षुरा ह्यङ्गतकाः शर्कराः शाल्मवेश्मकाः ॥")

शर्कराचलः, पुं, (शर्करामयोऽचलः।) दानार्थकृत्रिमशर्करामयाचलविशेषः। अस्य विवरणं पर्व्वतशब्दे द्रष्टव्यम् ॥

शर्कराधेनुः, स्त्री, (शर्कराभिर्निर्म्मिता धेनुः।) दानार्थशर्करानिर्म्मितधेनुः। तद्विधिर्यथा,—
श्रीहोतोवाच।
"तद्वत् शर्कराधेनुं शृणु राजन् यथार्थतः।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं शर्करया राजन् कृत्वा भारचतुष्टयम्।
उत्तमा कथ्यते सद्भिश्चतुर्थांशेन वत्सकम् ॥
तदर्द्धं मध्यमा प्रोक्ता कनिष्ठा भारकेण तु।
तद्वत् वत्सं प्रकुर्व्वीत चतुर्थांशेन तत्त्वतः ॥
अथ कुर्य्याद्दृष्टशतैरूर्द्धं नृपतिसत्तम।
स्वशक्त्या कारयेद्धेनुं यथात्मानं न पीड़येत् ॥
सर्व्वबीजानि संस्थाप्य चतुर्दिक्षु समन्ततः।
सौवर्णमुखशृङ्गाणि मौक्तिकानयने तथा ॥
गुड़ेन तु मुखं कार्य्यं जिह्वा पिष्टमयी तथा।
कम्बलं पट्टसूत्रेण कण्ठाभरणभूषितम् ॥
इक्षुपादां रौप्यखुरां नवनीतमयस्तनीम्।
प्रशस्तपत्रश्रवणां सितचामरभूषिताम् ॥
पञ्चरत्नसमायुक्तां वस्त्रैराच्छादितां तथा।
गन्धपुष्पैरलङ्कृत्य ब्राह्मणाय कुटुम्बिने ॥
श्रोत्रियाय दरिद्राय साधुवृत्ताय धीमते।
वेदवेदाङ्गविदुषे ग्राहिताग्नेर्विशेषतः ॥
अदुष्टाय प्रदातव्या न तु मत्सरिणे नृप।
अयने विषुवे पुण्ये व्यतीपाते शशिक्षये ॥
एषु पुण्येषु कालेषु यदृच्छया वा सदार्पयेत्।
सत्पात्रन्तु द्विजं दृष्ट्वा आगतं श्रोत्रियं गृहे ॥
तादृशाय प्रदातव्या पुच्छदेशे विगृह्य च।
पूर्व्वाभिमुखमास्थाय अथवा स उदङ्मुखः ॥
गां पूर्व्वाभिमुखीं कृत्वा वत्समुत्तरतो न्यसेत्।
दानकाले तु ये मन्त्रास्तान् पठित्वा समर्पयेत्॥
संपूज्य विधिवद्विप्रं मुद्रिकाकर्णभूषणैः।
स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जितः ॥
हस्ते तु दक्षिणां दत्त्वा गन्धपुष्पसचन्दनाम्।
धेनुं समर्पयेत्तस्य मुखञ्च न विलोकयेत् ॥
एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत्।
सर्व्वपापहरा धेनुः सर्वकामप्रदायिनी।
सर्वकामसमृद्धस्तु जायते नात्र संशयः ॥
दीयमानां प्रशंसन्ति ते यान्ति परमां गतिम्
य इदं शृणुयाद्भक्त्या पठते वापि मानवः।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥"
इति वाराहे शर्कराधेनुमाहात्म्यनामाध्यायः॥

शर्कराप्रभा, स्त्री, (शर्करेव प्रभा यस्याः।) जिनानां नरकविशेषः। यथा,—
"रत्नशर्करावालुकापङ्कधूमतमःप्रभा।
महातमःप्रभा चेत्यधोऽधो नरकभूमयः ॥"
इति हेमचन्द्रः ॥

शर्करार्वुदः, पुं, क्ली (शर्करावदर्वुदः।) क्षुद्ररोगविशेषः। तल्लक्षणं यथा,—
"प्राप्य मांसं शिराः स्नायुं मेदः श्लेष्मा तथानिलः
ग्रन्थिं करोत्यसौ भिन्नो मधुसर्पिर्वसानिभम्॥
स्रवत्यास्रावमत्यर्थं तत्र वृद्धिं गतोऽनिलः।
मांसं विशोष्य ग्रथितां शर्करां जनयत्यतः ॥
दुर्गन्धक्लिन्नमत्यर्थं नानावर्णं ततः शिराः।
स्रवन्ति सहसा रक्तं तं विन्द्याच्छर्करार्वुदम्॥"
शर्करा वालुकातुल्या। तच्चिकित्सा यथा,—
"मेदोऽर्वुदविधानेन साधयेच्छर्करार्व्वुदम् ॥"
इति भावप्रकाशः।

शर्करावान्, [त्] त्रि, (शर्करा विद्यतेऽस्मिन्। "देशेलुबिलचौ च।"५।२।१०५। इति मतुप्।) कर्पराशबहुलदेशः। तत्पर्य्यायः। शर्करा २ शर्करिलः ३ शार्करः ४। इत्यमरः ॥

शर्करासप्तमी, स्त्री, (शर्कराया दानविधायिका सप्तमी।) वैशाखीशुक्ला सप्तमी। तत्र व्रतविधिर्यथा,—
ईश्वर उवाच।
"शर्करासप्तमीं वक्ष्ये तद्वत् कल्मषनाशिनीम्।
आयुरारोग्यमैश्वर्य्यं ययानन्तं प्रजायते ॥
माधवस्य सिते पक्षे सप्तम्यां शुक्लपक्षतः।
प्रातः स्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः।
स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम् ॥
तस्मै नमः सवित्रे तु गन्धपुष्पं निवेदयेत्।
स्थापयेदुदकुम्भञ्च शर्करापात्रसंयुतम् ॥
शुक्लवस्त्रैरलङ्कृत्य शुक्लमाल्यानुलेपनैः।
सुवर्णाश्वसमायुक्तं मन्त्रेणानेन पूजयेत् ॥
विश्ववेदमयो यस्मात् वेदवादीति पठ्यते।
त्वमेवामृतसर्व्वस्वमतः कान्तिं प्रयच्छ मे ॥
पञ्चगव्यं ततः पीत्वा स्वपेत्तत्पार्श्वतः क्षितौ।
सौरसूक्तं स्मरन्नास्ते पुराणश्रवणेन च ॥
अहोरात्रे गते पश्चात् अष्टम्यां कृतनैत्यिकः।
तत् सर्व्वं वेदविदुषे ब्राह्मणाय निवेदयेत् ॥
भोजयेच्छक्तितो विप्रान् शर्कराघृतपायसैः।
भुञ्जीतातैललवणं स्वयमप्यथ वाग्यतः ॥
अनेन विधिना सर्वं मासि मासि समाचरेत्।
संवत्सरान्ते शयनं शर्कराकलसान्वितम् ॥
सर्व्वोपस्करसंयुक्तं तथैकां गां पयस्विनीम्।
गृहञ्च शक्तितो दद्यात् समस्तोपस्करान्वितम्॥
सहस्रेणाथ निष्काणां कृत्वा दद्यात् शतेन वा।
दशभिर्व्वाथ निष्काणां तदर्द्धेनाथ शक्तितः ॥
सुवर्णाश्वः प्रदातव्यः पूर्ववन्मन्त्रवाचनम्।
वित्तशाठ्यं न कुर्वीत कुर्वन् दोषं समश्नुते ॥
अमृतं पिबतो वक्त्रात् सूर्य्यस्यामृतबिन्दवः।
निपेतुर्ये तदुत्थास्ते शालिमुद्गेक्षवः स्मृताः ॥
शर्करापरमस्तस्मादिक्षुसारोऽमृतात्मकः।
इष्टा रवेरतः पुण्या शर्कराहव्यकव्ययोः ॥
शर्करा सप्तमी चैषा वाजपेयफलप्रदा।
सर्वदुःखोपशमनीं पुत्त्रसन्ततिवर्द्धनीम् ॥
यः कुर्य्यात् परया भक्त्या स परं ब्रह्म गच्छति
कल्पमेकं वसेत् स्वर्गे ततो याति महत् पदम् ॥
इदमनघं शृणोति यः स्मरेद्वा
परिपठतीह दिवाकरस्य लोके।
मतिमपि च ददाति सोऽपि
देवैरमरवधूजनमालया च पूज्यः ॥"
इति मात्स्ये ७२ अध्यायः ॥

शर्करिकः, त्रि, (शर्करा विद्यते अस्मिन्। "वुञ्छण्कठजिलेति।"४।२।८०। इति कुमुदादित्वात् ठक्।) शर्करावान्। इति सिद्धान्तकौमुदी ॥

शर्करिलः, त्रि, (शर्करा विद्यते अस्मिन्। "देशे लुबिलचौ च।"५। २। १०५। इति इलच्। शर्करावान्। इत्यमरः ॥

शकरी, स्त्री, कन्दोविशेषः। नदी। मेखला। इति हस्तलिखितमेदिनी ॥ लेखनी। इति धरणिः मुद्राङ्कितमेदिनीहेमचन्द्रयोः रेफशून्यतकरारमध्यपाठः। अस्या विवरणं शक्करीशब्दे द्रष्टव्यम् ॥